International Journal of Multidisciplinary Horizon

ISSN:3049-2017
IJMH 2024; 1(3): 22-26
© 2024 IJMH
www.themultijournal.com
Received: 20-08-2024
Accepted: 29-08-2024
Publish : 30-08-2024

**चापाटि षण्मुखजानकीरमणः**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालय,
तिरुपतिः

**Correspondence:**
**चापाटि षण्मुखजानकीरमणः**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालय,
तिरुपतिः

# वैयाकरणसिद्धान्तकौमुदीव्याख्यायाः श्रीलक्ष्मीनृसिंहप्रणीतायाः विलासाख्यायाः समासप्रकरणस्य स्थूलतः परिशीलनम्

**चापाटि षण्मुखजानकीरमणः**

**कूटशब्दाः** - वैयाकरणसिद्धान्तकौमुदी, कौमुदी, विलासः, व्याख्या, ग्रन्थः, पाठः, मातृका, समासः, प्रत्ययः, सूत्रम्, वार्तिकम्, भाष्यम् इत्येते शब्दाः निबन्धेऽस्मिन् मुख्याः भवन्ति।

**उपक्रमः -**

अष्टाध्यायीप्रक्रियाग्रन्थेषु भट्टोजिदीक्षितैः विरचितः सिद्धान्तकौमुदीनामकग्रन्थः शृङ्गायते। यतो हि पूर्वं विद्यमानेषु रूपावतार-प्रक्रियाकौमुदीत्यादिषु प्रक्रियाग्रन्थेषु अष्टाध्याय्याः समस्तसूत्राणां सन्निवेशः नासीत्, किन्तु भट्टोजिदीक्षितैः समग्राष्टाध्यायीसूत्राणि प्रकरणवशात् प्रविभज्य तदर्थवर्णनमकारि। समग्रग्रन्थस्य विभागश्च त्रयोदशसु प्रकरणेषु व्यधायि। तानि च – संज्ञा-परिभाषा-सन्धि-सुबन्त-अव्यय-स्त्रीप्रत्यय-कारक-समास-तद्धित-तिङन्त-कृदन्त-वैदिक-स्वर-नामधेयकानि वर्तन्ते। अतः सिद्धान्तकौमुदी प्रक्रियानुसारिपाणिनीयवृत्तिषु मूर्धन्यतां भजते। सैषा कौमुदी न केवलं शब्दरचनप्रक्रियामेव किन्तु वैयाकरणसिद्धान्तसंग्रहात्मकतया अवबोधे अधिकसारल्याद् अद्यत्वेऽतिमात्रं लब्धप्रचारा सञ्जाता। अतः आभाणकमिदं लोके प्रथितं वर्तते। यथा -

**कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।**
**कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः॥** इति।

भट्टोजिदीक्षितविरचितसिद्धान्तकौमुदीमधिकृत्य बहवः प्रकाशिताः अप्रकाशिताश्च व्याख्यानग्रन्थाः उपलभ्यन्ते। यद्यपि बह्व्यः व्याख्याः अस्याः कौमुद्याः लभ्यन्ते तथापि अन्येऽपि केचन व्याख्याग्रन्थाः सम्प्रत्यपि अप्रकाशिताः मातृकारूपेण उपलभ्यन्ते। तासु मातृकासु श्रीलक्ष्मीनृसिंहमहाशय-प्रणीतविलासव्याख्याऽपि अन्यतमा।

**ग्रन्थकर्तुः परिचयः -**

*अस्य ग्रन्थस्य कर्ता श्रीलक्ष्मीनृसिंहमहाशयः। अयम् आन्ध्रदेशीयः गोदावरीमण्डलस्थः इत्यनुमीयते। एषः महीधरकुलसम्भवः, रामाम्बा-कोण्डुभट्टदम्पत्योः सुपुत्रः इति च ज्ञायते। अस्य महाशयस्य समासप्रकरणसम्बन्धितया या व्याख्या वर्तते तत्र किञ्चिदिव परामृश्यते।*

**१. नदीपौर्णमास्याग्रहायणीभ्यः - ५.४.११०**

अत्र सूत्र 'इत्यादीति' इति प्रतीकमादाय 'उपाग्रहायणम्, उपाग्रहायणि इत्यप्युदाहार्यमिति भावः' इति पाठः दृश्यते विलासे। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु तु मूले एव विलासोक्तस्य उदाहरणद्वयस्य स्पष्टमुक्तत्वात् 'इत्यादीति' इति प्रतीकः न दृश्यते।

**२. कर्तृकरणे कृता बहुलम् - २.१.३२**

अस्मिन् सूत्रे 'पचतितरामिति' इति प्रतीकमादाय '"तिङश्च"[1] इति तरप्' इति पाठः विलासे दृश्यते। अयं पाठः न समीचीनः। तेन सूत्रेण तमपो विधानात्। तरप् तु "द्विवचनविभज्योपपदे"[2] इत्यादिसूत्रेणैव।

**३. चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः - २.१.३६**

अस्मिन् सूत्रे 'यूपायेति' इति प्रतीकमादाय 'तादर्थ्ये चतुर्थीसमासविधानसामर्थ्यादेव चतुर्थी' इति पङ्क्तिः दृश्यते विलासे। तथा च चतुर्थीसमासविधानात् ज्ञापकात् अत्र चतुर्थीविभक्तिः साधनीया इति विलासकाराणामाशयः। वस्तुतस्तु मुक्तये हरिं भजति इत्यादाविव "तादर्थ्ये चतुर्थी वाच्या"[3] इति

वार्तिकेन चतुर्थी विहितैवेति सामर्थ्यमाश्रित्य समाससाधनस्यावश्यकता नास्ति। अत एव शेखरे, तत्त्वबोधिन्याञ्च 'तादर्थ्ये चतुर्थी' इत्येव व्याख्यातम्।

**४. पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन - २.२.११**

एतत्सूत्रव्याख्यावसरे - 'सच्छब्दार्थमाह - शतृशानचोरिति' इति पाठः दृश्यते। "तौ सत्"[4] इति सूत्रेण विधीयमानयोः शतृशानचोः सदिति संज्ञेति तदाशयः। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु अयं प्रतीकः न लभ्यते।

**५. गोरतद्धितलुकि - ५.४.९२**

अस्मिन् सूत्रे 'न त्विति' इति प्रतीकः स्वीकृतः। 'तद्धितलुग्विषये न टजित्यर्थः' इति व्याख्यातञ्च। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु 'तु' शब्दरहिततया 'न तद्धितलुकि' इति पाठः दृश्यते। अर्थे न कोऽपि विशेषः।

**६. द्विगुरेकवचनम् - २.४.१**

एतत्सूत्रव्याख्यावसरे 'द्विगोरर्थः' इति प्रतीकः स्वीकृतः। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु 'द्विग्वर्थः' इत्येव पाठः दृश्यते। विलासे विग्रहवाक्यप्रदर्शनपुरस्सरं व्याख्यातम्। इतरत्र तु समस्तरूपं दर्शितमित्येव भेदोऽत्र।

**७. पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च - २.१.५८**

एतत्सूत्रव्याख्यावसरे 'बाहुलकादिति' इति प्रतीकः स्वीकृतः। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु 'बहुलग्रहणात्' इति पाठः दृश्यते। उभयोरपि पाठयोः अर्थे न भेदः, किन्तु पाठे एव।

**८. साक्षात्प्रभृतीनि च - १.४.७४**

एतत्सूत्रव्याख्यावसरे 'एतानीति' इति प्रतीकमादाय साक्षात्प्र-भृतीनि इत्यर्थः वर्णितः। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु 'एता-नीति' पदं विनैव पाठः दृश्यते।

**९. द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः - ६.३.४७**

सूत्रस्थं पदमादाय व्याख्याकाराः स्वीयां व्याख्यां कुर्वन्ति। अस्मिन् सूत्रे 'द्व्यष्टनः' इति एकवचनान्तमेव पदं श्रूयते। न तु 'द्व्यष्टनोः' इति। अतः अत्र समाहारद्वन्द्वस्वीकारे एकवचनान्तप्रयोगः युज्यते। एवं स्थिते लक्ष्मीनृसिंहाचार्यैः 'द्व्यष्टनोः' इति द्विवचनान्तः प्रतीकः कथं वा स्वीकृतः ? इति तु सन्दिग्धं वर्तते। अतः अत्र 'द्व्यष्टनः' इत्येव प्रतीकः युज्यते इति मे भाति। "विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्"[5] सूत्रे 'द्व्यष्टनोः' इति द्विवचनान्तः प्रतीकः दृश्यते तद्वदत्रापि द्विवचनान्त एव स्वीकृतः स्यात्।

**१०. एकादिश्चैकस्य चादुक् - ६.३.७६**

"पृषोदरादीनि यथोपदिष्टम्"[6] इति सूत्रभाष्यस्थकैयटे इदं निरूपितम् - "ष्टुत्वं नित्यमेव भवति। उत्तरपदशब्देनात्र भाष्ये धाप्रत्ययोऽभिधीयते" इति "पृषोदरादीनि यथोपदिष्टम्"[7] इति सूत्रव्याख्यानवसरे कैयटे 'षड्धा' इति पाठं स्वीकृत्य "न पदान्ताट्टोरनाम्"[8] इति निषेधात् धकारस्य ष्टुत्वं न भवतीत्युक्तम्। वृत्तिग्रन्थे पदमञ्जर्याञ्च 'षड्धा' इत्येव पाठः अभ्युपगतः। नागेशोपाध्यायस्तु - षड्ढा इति ढकारविशिष्टैव पाठः भाष्यसम्मतः इति उद्योते, शेखरे च निरूपयामास। अत एव तत्सूत्रभाष्ये 'धासु वा' इति वार्तिकव्याख्यावसरे 'षड्ढा कुरु' इत्येव पाठः दृश्यते।

**११. रात्राह्नाहाः पुंसि - २.४.२९**

'रात्रं प्राक् संख्ययान्वितम्' इति अमरकोशः। अत्र सुधाकारः[9] - संख्यापूर्वपदं रात्रान्तं क्लीबम्। त्रिरात्रं, पञ्चरात्रम्। एवं स्थिते 'वृत्तिग्रन्थम् अमरकोशञ्च' इत्यादिवाक्ये वृत्तिग्रन्थशब्देन कः ग्रन्थः स्वीकर्तव्यः ? इति जिज्ञासे। माधवीयधातुवृत्तौ[10] तु द्विरात्रः इति पुल्लिङ्ग एव स्वीकृतः।

अस्यैव सूत्रस्य व्याख्यावसरे 'अन्तरङ्गत्वादिति' इति प्रतीकः दृश्यते। सम्प्रत्युपलभ्यमानेषु क्वचित् कौमुदीग्रन्थेषु 'अनन्तरत्वात्' इति पाठः लभ्यते। स तु पाठः न युक्तः। मन्ये मुद्रणदोषवशात् तथा पाठः आगतः इति।

**१२. तसिलादिष्वाकृत्वसुचः - ६.३.३५**

एतत्सूत्रव्याख्यावसरे 'एतदिति' इति प्रतीकव्याख्यावसरे - 'सर्वनामसंज्ञकात् एकशब्देन विहितितया' इति पाठः दृश्यते। मन्ये अत्र 'सर्वनामसंज्ञकस्य एकशब्दस्य विहिततया' इत्येव पाठः युक्तः स्याद्वा? इति। तत्त्वबोधिनीकारस्तु - सर्वस्मात् आगतः इत्यर्थे सर्वशब्दात् मयट् प्रत्ययं विधाय सर्वमयः इत्युदाहरणं दर्शितवान्। अत्र किञ्चिद् जिज्ञासे। तत्त्वबोधिनीपङ्क्तिः इत्थं वर्वते - तत आगत इत्यर्थे 'मयड्वा' इति मयट् - इति। आगते अर्थे "मयट् च"[11] इत्येव सूत्रं वर्तते, न तु "मयड्वा" इत्यादि। शेखरेऽपि 'मयट् च' इत्येव पाठः दृश्यते। अन्यत्र तत्त्वबोधिन्यां तु 'मयट् च' इत्येव पाठः दृश्यते। अयमेव पाठः समीचीनः। विलासकारास्तु विकारार्थे अवयवार्थे च मयटं दर्शयन्ति। रूपन्तु उभयत्रापि समानमेव।

**१३. न कोपधायाः - ६.३.३७**

"न कोपधायाः"[12] इति सूत्रस्य स्थाने "न तद्धितकोपधायाः" इत्येवं सूत्रं पठनीयमिति वार्तिककाराणामाशय इति विलासकाराः वर्णयन्ति। *सिद्धान्तकौमुद्यान्तु अयमंशः न दृश्यते।*

**१४. तत्र तेनेदमिति सरूपे - २.२.२७**

'इदं युद्धं प्रवृत्तम्' इति पाठापेक्षया 'इदं युद्धं प्रवर्तितम्' इत्येव पाठः समीचीनः - इति विलासकाराः। यद्यपि अन्तर्भावितणिजर्थमादाय प्रवृत्तमिति पाठः आश्रयितुं शक्यः, किन्तु तद्रीत्याश्रयणे किञ्चिदिव क्लेशः स्यादिति विलासकाराणामभिप्रायः।

**१५. वोपसर्जनस्य - ६.३.८२**

विलासः - उपसर्जनस्येति। इदं न सहशब्दस्य विशेषणम्। अस्यासत्त्ववाचितया द्वन्द्वासंभवेनाव्यभिचारात्। सहयुक्तेत्यादावतिप्रसङ्गाच्च। किन्तूत्तरपदेनोपस्थापितस्य समासस्य।

न्यासः - यदि 'उपसर्जनस्य' इत्येतत् सहशब्दस्य विशेषणं स्यात् तदाऽतिप्रसङ्गः स्यात्। विशेषानुपादानादिहापि स्यात् - सहयुध्वा, सहकृत्वेति। अत्रापि सहशब्द उपसर्जनम्, 'उपपदमतिङ्' इति प्रथमानिर्देशात्, अप्राधान्याच्च। अनर्थकञ्च विशेषणं स्यात्; सर्वत्रैव हि समासे सहशब्दस्योपसर्जनत्वात्। न्यासग्रन्थे अयमंशः विस्तरेण वर्णितः।

**१६. सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः - ५.४.१२०**

अत्र 'तत्कालीनमिति' पदं प्रयुक्तम् श्रीमद्भिः विलासकारैः। मन्ये न्यायवासनया इदं प्रयुक्तं स्यात्। अन्यथा "कालाट्ठञ्"[13] इति ठञ् प्रत्यये इकारादेशे च सति तत्कालिकमित्येव प्रयोक्तव्यम्। सुस्पष्टमिदं "कालाट्ठञ्"[14] इति सूत्रे मूलकौमुद्याम्।

**१७. नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् - ५.४.१२१**

अज्वेति। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु वा शब्दं विना 'अजिति' इत्येव प्रतीकः लभ्यते। वस्तुतः 'अज्वा' इत्येव पाठः युज्यतेतराम्, अच्प्रत्ययस्य विकल्पतया विधानात्। अत एव च काशिकायां 'अन्यतरस्यामच् प्रत्ययः' इत्येव व्याख्यानं दृश्यते।

**१८. नित्यमसिच् प्रजामेधयोः - ५.४.१२२**

विलासः - पूर्वसूत्रादन्यतरस्यामित्यस्य स्वरितत्वाभावादेवाननुवृत्तिसंभवे तद्व्यावर्तनाय नित्यग्रहणादन्यत्रापि भवति - मन्दमेधाः अल्पमेधाः इति वृत्तौ।

काशिका - नित्यग्रहणं किम् ? यावता पूर्वसूत्रेऽन्यतरस्यांग्रहणं नैव स्वर्यते? एवं तर्हि नित्यग्रहणेनान्यत्रापि भवतीति सूच्यते।

**श्रोत्रियस्येव ते राजन् मन्दकस्याल्पमेधसः।**
**अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी ॥**

**१९. धर्मादनिच् केवलात् - ५.४.१२४**

एतत्सूत्रव्याख्यावसरे 'एवञ्च' इत्येवं चशब्दघटिततया पाठः दृश्यते। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु 'एवन्तु' इति पाठः लभ्यते। उभयत्रापि अर्थस्समान एव।

**२०. द्विदण्ड्यादिभ्यश्च - ५.४.१२८**

द्विदण्डीति प्रतीकमादाय - द्विदण्डं यथा तथा प्रहरतीत्यर्थः - इति पङ्क्तिः दृश्यते विलासव्याख्याने। न्यासग्रन्थेऽपि एतादृशः एव पाठः लभ्यते। मूलकौमुद्यां तु - द्वौ दण्डौ यस्मिन् प्रहरणे तत् द्विदण्डि प्रहरणम् - इति दृश्यते। अयमेव क्रमः पदमञ्जर्यां दृश्यते। अतोऽत्र न्यासविलासकारयोः यन्मतं, तद्भिन्नतया हरदत्त-दीक्षितयोः मतं दृश्यते। कतरद्वा मतं युज्यतेतरामित्यत्र पण्डिताः प्रमाणम्।

**२१. लोपो व्योर्वलि - ६.१.६६**

एतत्सूत्रव्याख्यावसरे विलासकारैः युवजानिरित्यत्र प्रक्रिया विचारिता। तेषामाशयः - "स्त्रियाः पुंवत्"[15] इत्यादिसूत्रभाष्यस्थ-कैयटग्रन्थानुरोधेन युवतिजानिः इति पुंवद्भावनिषेधबोधकं रूपं दर्शितम्। तैरेव विलासकारैः "अचः परस्मिन्" इति सूत्रस्थभाष्यानुरोधेन पुंवद्भावं स्वीकृत्य *युवजानिः* इति पुंवद्भावघटितमेव रूपं प्रदर्शयद्भिः एतद्रूपविषये स्वेषां परमगुरुचरणानामपि स्मरणं कृतवन्तः। अत्र किं कैयटम*तं युज्यते* उत भाष्यकारप्रयोगः *?* इत्यालोचने मुनित्रयघटकत्वात् कैयटव्याख्यापेक्षया भाष्यप्रयोग एव शरणीकर्तव्यः इति विलासकाराणामाशयः। अयमेव अंशः "ङ्याप्प्रातिपदिकात्" इति सूत्रे उद्योतग्रन्थे समर्थितः। अत एवान्ते - "सर्वथापि पुंवद्भावः सिद्धः इत्याशयेन उदाहरति युवतिरिति" इत्युक्तं विलासकारैः।

**२२. सप्तमीविशेषणे बहुव्रीहौ - २.२.३५**

एतत्सूत्रव्याख्यावसरे 'प्रागिति' प्रतीकः दृश्यते। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु 'पूर्वम्' इत्येव पाठः दृश्यते। न तु 'प्राक्' इति। अर्थे तु नास्ति कश्चन भेदः।

अस्यैव सूत्रव्याख्यानावसरे "मिथोऽनयोः" इत्यादिवार्तिकं 'शब्दपर' इति पाठः दृश्यते सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु। विलासकारलब्धे तु 'पदपर' इति पाठः दृश्यते। अर्थे तु नास्ति भेदः।

**२३. चार्थे द्वन्द्वः - २.२.२९**

सञ्ज्ञापरिभाषाम्। 'संज्ञेति' इति प्रतीकादनन्तरं 'नपुंसकमिति' इति प्रतीकः विलासे दृश्यते। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु अयं प्रतीकः नदृश्यते। मन्ये - 'संज्ञापरिभाषम् इत्यत्र "स नपुंसकम्" इति नपुंसकम्' इत्येवं रूपं कौमुदीमूलं विलासकृता वीक्षितः स्यात् - इति।

**२४. अल्पाच्तरम् - २.२.३४**

नारदेति। "अभ्यर्हितञ्च" इति वार्तिकस्योदाहरणं नारदपर्वतौ इति दर्शितं विलासकारेण। अत एव 'नारदेति' इति प्रतीकः तत्र दृश्यते। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु तु 'तापसपर्वतौ' इत्येव उदाहृतम्।

**२५. विशिष्टलिङ्गो नदी देशोऽग्रामाः - २.४.७**

'मध्यमश्चेति' प्रतीकमादाय मध्यशोणौ नदीविशेषौ इति व्याख्यातं विलासकारैः। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु तु मध्यशब्दस्य स्थाने गङ्गाशब्दः वर्तते।

अस्मिन् सूत्रे 'नदीदेशः' इति पदं श्रूयते। नदीवाचिनां देशवाचिनाञ्च समाहारे द्वन्द्वस्य एकवद्भावः उक्तः। तत्र उदाहरणानि च दर्शितानि। एवं स्थिते विलासकारैः - ''नदीदेश' इति किम्? कुक्कुटमयूर्यौ' इत्येवं 'नदीदेशः' इत्यस्य प्रत्युदाहरणं दर्शितम्। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु तु अस्य विशेषणस्य सार्थक्यं न विचारितम्।

**२६. येषां च विरोधः शाश्वतिकः - २.४.९**

अस्मिन् सूत्रे श्रूयमाणस्य 'च' शब्दस्य प्रयोजनं वर्णयन् 'अश्वमहिषमिति' इति प्रतीकं दर्शयामास विलासकारः। तत्र अयमभिप्रायः - अस्मिन् सूत्रे चकारः द्वन्द्वे एकवद्भावस्यैव पुनः प्रतिपादनार्थः। तेन "विभाषा वृक्षमृग"[16] इत्यादिसूत्रेण पशुद्वन्द्वे वैकल्पिकः यः एकवद्भावः उक्तः तं प्रबाध्य अश्वमहिषम् इत्यादौ तु नित्यमेव एकवद्भावः भवतीति सूचयितुं सूत्रकृता चशब्दः प्रयुक्तः इति। स्पष्टोऽयमाशयः वृत्तिग्रन्थे। अयं विचारः सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु न दृश्यते।

**२७. शूद्राणामनिरवसितानाम् - २.४.१०**

अस्मिन् सूत्रे 'अनिरवसितानाम्' इति पदं दृश्यते। "केषुचित् प्रदेशविशेषेषु निवसन्तः चण्डालमृतपाः इति व्यवह्रियन्ते। तत्र चण्डालाश्च मृतपाश्च इति द्वन्द्वः। प्रकृतसूत्रे 'अनिरवसितानाम्' इति पर्युदासेन प्रकृते एकवद्भावः न भवति" इति वाक्यम्। चण्डालशब्दार्थः विलासकारेण वर्णितः। मृतपाः नाम डोम्बाः इति कैयटोक्तिं प्रमाणतया दर्शितवान्। तत्र डोम्बाः नाम श्मशाननिकटे मृतवस्त्रचितिकाष्ठादिसङ्ग्राहकाः चण्डालसदृ*शाः* ये ते इति उद्योतकारः व्याचख्यौ।

**२८.विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराध-रोत्तराणाम् - २.४.१२**

अस्मिन् सूत्रे 'वा प्राग्वत्' इति प्रतीकः धृतः विलासकारेण। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु 'प्राग्वद्वा' इति प्रतीकः दृश्यते। *अर्थे तु न कश्चन भेदः।*

**२९. ऋक्पूरब्धूःपथामानक्षे - ५.४.७४**

'अध्येतर्येवेति' इति प्रतीके 'यद्यपि अनृचो माणवको ज्ञेयो बह्वृचश्चरणाख्यायाम् इत्येव वार्तिकम्' इति वदन्तः विलासकाराः इदं वचनं वार्तिकत्वेन वर्णयन्ति। वस्तुतस्तु नेदं वार्तिकम्। किन्तु "शेषाद्विभाषा"[17] इति सूत्रस्थं भाष्यकारवचनम्।

**३०. ऊदनोर्देशे - ६.३.९८**

अस्मिन् सूत्रे दीर्घोच्चारणम् अवग्रहार्थमिति भाष्ये उक्तमिति विलासकारः प्रतिपादयति। वृत्तिग्रन्थे पदमञ्जर्याञ्च अयं विचारः दृश्यते।

**३१. अच् प्रत्यन्ववपूर्वात् सामलोम्नः - ५.४.७५**

एतत्सूत्रव्याख्यावसरे गोदावर्याश्च नद्याः संख्याया उत्तरे यदि। भूमेरपि संख्यापूर्वाया प्रत्यय इष्यते॥ इति कश्चन श्लोकः दृश्यते। अस्मिन् श्लोके सन्ति काश्चन त्रुटयः। शुद्धः श्लोकस्तु काशिकायां द्रष्टुं शक्यते यथा -

**कृष्णोदक्पाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृतः।**
**गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदि॥** इति।

**३२. श्वसो वसीयःश्रेयसः - ५.४.८०**

'श्वस् शब्दः इति' इति प्रतीकमादाय 'अन्यत्र कालविशेष्यवाच्यपि अभिधत्ते' इति पङ्क्तिः वृत्तिग्रन्थे वर्तते इति निरूपितम्। वस्तुतस्तु इयं पङ्क्तिः न्यासे पदमञ्जर्याञ्च दृश्यते। अत्रैव 'स्वभावादिति' इति प्रतीकमादय किञ्चिद्व्याख्यातं विलासकृता। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु प्रतीकोऽयं न दृश्यते।

**३३. किमः क्षेपे - ५.४.७०**

एतत्सूत्रव्याख्यानावसरे 'किमिति' प्रतीकं स्वीकृत्य - 'अत्र किमिति लुप्तपञ्चमीकम्' इति विवृतम्। अत्र मन्येऽहं - अयं प्रतीकः एतद्विवरणञ्च न सम्यगिति। यतः सूत्रं "किमः क्षेपे"[18] इत्यानुपूर्व्या एव पठितम्। अत्र किंशब्दात् पञ्चमीविभक्तिः श्रूयते एव। एवं सति "अत्र किमिति लुप्तपञ्चमीकम्" इति यद्विवरणं तत् न शोभते एव। किञ्च "किं क्षेपे" इत्येवंरूपाम् आनुपूर्वीं सूत्रे समाश्रित्य इदं विवरणं दत्तं स्यादिति मे भाति।

**३४. शयवासवासिष्वकालात् - ६.३.१८**

एतत्सूत्रव्याख्यायां 'हलदन्तादित्येव, भूमिशयः' इति पङ्क्तिः दृश्यते विलासे। इयञ्च पङ्क्तिः मूले एव लभ्यते। भवतु, अत्र किञ्चिद्व्याख्यातं वा इत्युक्ते तदपि न कृतम्। अनेन ज्ञायते - तैः यः कौमुदीग्रन्थः लब्धः तत्रायं पाठः नास्ति - इति।

**३५. घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः - ६.३.४३**

'चेलडिति' इति प्रतीकात्परं - 'गुणस्य वच्यादेशस्य चाभावो निपातनात्' इति पङ्क्तिः विलासे सँल्लक्ष्यते। सम्प्रत्युपलभ्यमान-कौमुदीग्रन्थेषु मूले एव इदं दृश्यते।

**३६. इको ह्रस्वोऽङ्यो गालवस्य - ६.३.६१**

'शुक्लीभाव इति' इति प्रतीकात्परं च्विप्रत्ययस्य '"ऊर्यादि-च्विडाचश्च"[19] इति निपातनादव्ययत्वम्' इति पङ्क्तिः परिदृश्यते। वस्तुतस्तु च्विप्रत्ययान्तस्य "स्वरादिनिपातमव्ययम्"[20] इति सूत्रेणैव अव्ययत्वम्। किञ्च "ऊर्यादिच्विडाचश्च"[21] इति सूत्रं गतिसंज्ञावि-धायकम्, न तु अव्ययसंज्ञाविधायकम्।

अत्रैवाग्रे 'भुव' इति प्रतीकात्परं "इन्कृषादिभ्यः" इत्युणादिसूत्रेण इ*नि* कुटिः इति रूपसिद्धिर्दर्शिता। इदं सूत्रं नास्त्येव। वस्तुतस्तु 'इगुपधात् कित्' इत्युणादिसूत्रेणैव तत्र इन् प्रत्ययः क्रियते।

**३७. इष्टकेषीकामालानां चिततूलभारिषु - ६.३.६५**

'मालभारीति' इति प्रतीकात्परं सूत्रे 'हारिषु' इति पाठः दृश्यते, भारिषु इत्येव पाठः उन्नेयः इति वदन्तः विलासकाराः हरदत्त-वचनमपि प्रमाणतया प्रादर्शयन्/ सम्प्रत्युपलभ्यमानकौमुदीग्रन्थेषु 'भारिषु'इत्येव पाठः दृश्यते।

**३८. तीर्थे ये - ६.३.८७**

'एकगुरुरिति' इति प्रतीकमादाय 'एकगुरुक इत्यर्थः' इति व्याख्यातं विलासे। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु 'एकगुरुकः' इत्येव पाठः लभ्यते।

**३९. इदङ्किमोरीश्की - ६.३.९०**

'ईदृगित्यादि' इति प्रतीके 'शित्त्वादनेकल्त्वात्सर्वादेशः' इति पाठः दृश्यते। वस्तुतस्तु शित्त्वात् सर्वादेशः इत्येव पाठः कर्तव्यः। सर्वादेशे इदमुभयं निमित्तमेकत्र नैव लभ्यते।

**४०. प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि - ८.४.५**

अत्र 'अन्तर्वणमिति' इति प्रतीकं धृत्वा 'विभक्त्यर्थे अव्ययीभावः' इत्युक्तम्। सम्प्रत्युपलभ्यमानेषु कौमुदीग्रन्थेषु प्रतीकोऽयं न दृश्यते।

**उपसंहारः -**

*इत्थमत्र निबन्धे समासप्रकरणसम्बन्धितया किञ्चिदिव परामृष्टम्।*

**उपयुक्तग्रन्थसूची -**


1. (G.O.M.L. Madras) Ms. No. D. 1448 *तालपत्रमातृका। ग्रन्थलिप्यां लिखिता। 16 5/8* x 1½ *परिमाणवती।* 227 *पत्राणि। प्रतिपत्रं दश पङ्क्तयः। उत्तमावस्थायामस्ति।*
2. (G.O.M.L. Madras) Ms. No. D. 1446 *तालपत्रमातृका। तेलुगुलिप्यां लिखिता।* 18½ x 1½ *परिमाणवती।* 307 *पत्राणि। प्रतिपत्रं सप्त पङ्क्तयः। किञ्चिदिव भग्ना।*
3. (G.O.M.L. Madras) Ms. No. R. 138 *तालपत्रमातृका। ग्रन्थलिप्यां लिखिता। 19* x 1½ *परिमाणवती। 250 पत्राणि। प्रतिपत्रं सप्त पङ्क्तयः। एकस्मिन् पार्श्वे भग्ना।*
4. (N.S.U. Tirupati) Ms. No. 1507 *तालपत्रमातृका। ग्रन्थलिप्यां लिखिता। 152 पत्राणि। प्रतिपत्रं सप्त पङ्क्तयः। किञ्चिदिव भग्ना।*
5. (N.S.U. Tirupati) Ms. No. 1517 *तालपत्रमातृका। ग्रन्थलिप्यां लिखिता।* 212 *पत्राणि। प्रतिपत्रं सप्त पङ्क्तयः। किञ्चिदिव भग्ना।*
6. *अष्टाध्यायी - पाणिनिः, व्याख्याकारः – डा. नरेश झा; प्रकाशकः– चौखम्वा सुरभारती प्रकाशन, वाराणसी, २००६।*
7. *काशिकावृत्तिः - वामनजयादित्यविरचिता, न्यासपदमञ्जरीसहीता, सुधीप्रकाशनम्, वाराणसी, १९८४।*
8. *न्यासः - जिनेन्द्रबुद्धिः, ताराप्रकाशनम्, वाराणसी, १९६६।*
9. *पदमञ्जरी - हरदत्तः, ताराप्रकाशनम्, वाराणसी, १९६६।*
10. *परिभाषेन्दुशेखरः - नागेशाभट्टः, व्याक्याकारः – विश्वनाथमिश्रः, प्रकाशकः – चौखम्बा सुरभारती प्रकाशन, वाराणसी।*
11. *पाणिनीयशिक्षा - पाणिनिः, मनोमोहनघोषसम्पादिता, कलकात्ता, १९३८।*
12. *लघुशब्देन्दुशेखरः - नागेशभट्टः, व्याख्याता-आचार्यः श्रीपाद सत्यनारायणमूर्तिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २००५।*
13. *वाक्यपदीयम् - भर्तृहरिः, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, २००६।*
14. *वैयाकरणसिद्धान्तकौमुदी - भट्टोजिदीक्षितः, चौखम्बा, १९५८।*
15. *वैयाकरणसिद्धान्तकौमुदी - भट्टोजिदीक्षितः, टीकात्रयसमलङ्कृता, भारतीय विद्या प्रकाशन, २००५।*
16. *व्याकरण-महाभाष्यम् - पतञ्जलिः, चौखम्बा कृष्णदास अकादमी, वाराणसी, १९९८।*
17. *शब्दकल्पद्रुमः - चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, १९६७।*


**संदर्भ**

1. *अष्टाध्यायी.* ५.३.५६ तिङश्च
2. *अष्टाध्यायी.* ५.३.५७ द्विवचनविभज्योपपदे तरबीयसुनौ
3. वार्तिकम्
4. *अष्टाध्यायी.* ३.२.१२७ तौ सत्
5. *अष्टाध्यायी.* ६.३.४९ विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्
6. *अष्टाध्यायी.* ६.३.१०९ पृषोदरादीनि यथोपदिष्टम्
7. *अष्टाध्यायी.* ६.३.१०९ पृषोदरादीनि यथोपदिष्टम्
8. *अष्टाध्यायी.* ८.४.४२ न पदान्ताट्टोरनाम्
9. *अमरकोशः.* काण्ड. १ - कालवर्गः
10. *अष्टाध्यायी.* पृ-366 रा-दाने धातुव्याख्यावसरे।
11. *अष्टाध्यायी.* ४.३.८२ मयट् च
12. *अष्टाध्यायी.* ६.३.३७ न कोपधायाः
13. ४.३.११ कालाट्ठञ्
14. ४.३.११ कालाट्ठञ्
15. ६.३.३४ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु
16. *२.४.१२ विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्*
17. *अष्टाध्यायी.* ५.४.१५४ शेषाद्विभाषा
18. *अष्टाध्यायी.* ५.४.७० किमः क्षेपे
19. *अष्टाध्यायी.* १.४.६१ ऊर्यादिच्विडाचश्च
20. *अष्टाध्यायी.* १.१.३७ स्वरादिनिपातमव्ययम्
21. *अष्टाध्यायी.* १.४.६१ ऊर्यादिच्विडाचश्च